RKMVERI/DSP/MAIS/17-22/D2019/MT/SK-101

# SK-101 कठोपनिषत् शाङ्करभाष्योपेता

कालावकाशः - द्वे होरे | अङ्काः - 50

**A) अत्र यथेष्टं पञ्च मन्त्रान् पूरयत। 1x5=5**

1. पीतोदका.....॥
2. न वित्तेन तर्पणीयो.....॥
3. अन्यच्छ्रेयोऽन्यदुतैव...॥
4. जानाम्यहं शेवधि......॥
5. अन्यत्र धर्मात्.......॥
6. अशरीरं शरीरेष्व........॥

**B) यः सेतुरीजीनानाम्...॥अधस्ताद् यथेच्छं पञ्च समाधत्त। 1x5=5**

1. वाजश्रवाः इत्यस्य अर्थः कः?
2. बहूनामेमि इत्यत्र मुख्यावृत्तिः का?
3. कथं यमः कामभाजं कर्तुं शक्नोति?
4. साम्परायशब्दस्य कोऽर्थः?
1. कथमात्मा अणोरणीयान्महतो महीयान्?
5. स्तोममहत् इत्यस्य कोऽर्थः?
6. आत्मा भोक्ता कथं भवति ?

**C) अधःस्थितेषु यथास्पहं पञ्च प्रश्नान् भाष्यदिशा उत्तरत। 3x5=15**

1. यमः वरत्रयातिरिक्तं किं किम् अदात् ?
2. "त्रिणाचिकेतस्त्रिभिरेत्य सन्धिम्" विवृणुत।
3. कुतो नचिकेता नान्यः वक्ता लभ्य इति चिन्तयति ?
4. श्वोभावा इत्यादिमन्त्रार्थं विशदयत।
5. न जायते इत्यादिमन्त्रस्य अर्थं विवृणुत।
6. नाशान्तमानसो वाऽपि इत्यत्र पुनरुक्तिदोषं परिहरत ?
7. विज्ञानवन्तं सारथिम् उपवर्णयत ?

**D) निम्नलिखितेषु यथेप्सं त्रीन् यथाभाष्यं विस्तारयत। 5x3=15**

1. कः शोकातिगो मोदते स्वर्गलोके?
2. के दन्द्रम्यमाणाः परियन्ति?
3. न नरेणावरेणेत्यादि मन्त्रं व्याख्यात ?
4. कः आत्मानम् आप्नुयात्?
5. ऋतं पिबन्तौ इत्यादिमन्त्रम् व्याख्यात।

**E) नीचैः दत्तेषु एकम् अनुप्रियम् अनुबध्नीत। 10x1=10**

1. ओङ्कारमहिमा।
2. द्वितीयवल्ल्याः सारं सङ्गृह्णीत।

RKMVERI/DSP/MAIS/17-22/D2019/MT/SK-102

## SK-102 ईशमुण्डकोपनिषदौ सशाङ्करभाष्ये

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

**A) यथाकामं दश प्रश्नान् उत्तरत। 1x10=10**

1. अग्नेः सप्तानां जिह्वानां नामधेयानि कानि।
2. अपरविद्याविषयः किमर्थम् प्रस्तूयते।
3. "अन्नात्प्राणो मनः सत्यम्" इति श्रुतेः प्रतिपदार्थः कः।
4. पृथिव्योषधिदृष्टान्तेन किं विवक्षितं श्रुत्या।
5. "तपसा चीयते ब्रह्म" इति श्रुतेः कोऽर्थः।
6. "तपःश्रद्धे ये ह्युपवसन्ति..." तपःश्रद्धयोः कोऽर्थः।
7. "तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्" इति लिङ्गेन किमवगम्यते।
8. "...अङ्गीरे ब्रह्मविद्याम्" इत्यत्र श्रुतस्य अङ्गिर्-शब्दस्य प्रथमायां द्वितीयायां तृतीयाञ्च विभक्तिषु वचनत्रयेऽपि रूपाणि प्रदर्शयत।
9. संन्यासनिष्ठैव ब्रह्मविद्या मोक्षसाधनं न कर्मसहितेति काभ्यां लिङ्गाभ्यामवगम्यते।
10. मनूक्तः स्थावरान्तसंसारगतिबोधकः श्लोकः कः।
11. पूरयत – "य इमाम् ब्रह्मविद्याम्... एवमर्थस्मरणात्"।
12. पूरयत – "तानेतान् परीक्ष्य... धर्माधर्मनिर्वर्तितानित्येतत्।"

**B) यथारुचि पञ्च उत्तरत। 3x5=15**

1. भाष्यकारभगवत्पादाः मध्यदीपिकान्यायम् प्रयुज्य किमाहुः।
2. "अप्राणो ह्यमनाः", "ध्यायतीव लेलायतीव" इत्यनयोः श्रुत्योरर्थसाम्यं विशदयत।
3. कृतलोकपरीक्षस्य वैराग्यप्रकारः कः।
4. "तदेतत् सत्यम्" – श्रुतेरस्याः अपरविद्याविषये परविद्याविषये चार्थभेदम् प्रदर्शयत।
5. "यः सर्वज्ञः सर्वविद् यस्य ज्ञानमयं तपः" – प्रतिपदार्थः प्रदर्श्यताम्।
6. "दिव्यो ह्यमूर्तः पुरुषः" – प्रतिपदार्थो दर्श्यताम्।
7. "अक्षरात् परतः परः" इत्यस्य कोऽर्थः।

**C) यथाच्छन्दं त्रीन् व्याख्यात।** **5x3=15**

1. सम्बन्धभाष्ये मुण्डकविद्यायाः सम्बन्धप्रयोजने कथमुद्घाटयन्ति भगवत्पादाः।
2. “यत्तदद्रेश्यम्...” इत्यादिमन्त्रं सम्पूर्णमुद्धृत्य प्रतिपदम् अर्थम् प्रदर्शयत।
3. “यथोर्णनाभिः...” इत्यादिमन्त्रं सम्पूर्णमुद्धृत्य दृष्टान्तत्रयस्वारस्यं व्याख्यात।
4. पावकविस्फुलिङ्गदृष्टान्तेन श्रुत्या बोधितं निरूपयत।
5. “प्लवा ह्येते...” (मुण्डकम् १.२. ७-१०) इत्यादिमन्त्रचतुष्टयस्य “तपःश्रद्धे...” (मुण्डकम् १.२.११) इति मन्त्रस्य च विषयभेदम् प्रदर्श्य तात्पर्यं विशदीकुरुत।

**D) अनुप्रियमेकम् व्याख्यात।** **10x1=10**

1. प्रथममुण्डकस्य प्रथमखण्डमाश्रित्य परविद्यास्वरूपं निरूपयत।
2. प्रथममुण्डकस्य द्वितीयखण्डमाश्रित्य अपरविद्यानिन्दापुरःसरम् परविद्याप्राप्त्युपक्रमं वर्णयत।

***

RKMVERI/DSP/MAIS/16-21/D2019/MT/SK- 103

**SK-103 छान्दोग्योपनिषदः शाङ्करभाष्यम्(6-8)**

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

**A) नीचैः दत्तेषु यथाकामं दश प्रश्नान् उत्तरत। 1x10=10**

1. किमर्थं षष्ठोऽध्याय आरभ्यते?
2. ब्रह्मबन्धु इत्यस्यार्थः कः?
3. गुरुकुलादागतवते पुत्राय पिता किं पप्रच्छ?
4. अवयवातिरिक्तस्य अवयविनोऽनङ्गीकारः कस्मिन्मते?
5. सतः ईक्षितृत्वं न गौणं, कुतः?
6. भुक्तस्यान्नस्य  यो मध्यमभागः सः किं भवति?
7. "पञ्चदशाहानि माशीः काममपः पिब" इति किमर्थं प्रोक्तम्?
8. स्वप्नान्तं नाम किम्?
9. तेजसा कार्यभूतेन किं प्रतिपत्तव्यम्?
10. भूतानां त्रीण्येव बीजानि, कानि तानि?
11. मनः पुरुषस्य दैवं चक्षुरित्युक्तं, कुतः?
12. "आत्मनाऽनुप्रविश्य" इत्यस्य भाष्योक्तार्थः कः?

**B) निम्नलिखितेषु यथारुचि पञ्च विव्रियन्ताम्। 3x5=15**

1. यथा सोम्यैकेन मृत्पिण्डेन ....।
2. सदेव सोम्येदमग्रे ....।
3. तदैक्षत बहु स्याम्.....।
4. सेयं देवतैक्षत ....।
5. यदग्ने रोहितं रूपम् ......।
6. अन्नमशितं त्रेधा विधीयते.....।
7. षोडशकलः सोम्य पुरुषः.....।

**C) अत्र यथाच्छन्दं त्रयः समाधेयाः।** **5x3=15**

1. तेजोबन्नात्मिका सृष्टिः।
2. परमेश्वरस्य जीवभावेन कार्यानुप्रवेशः।
3. "षोडशकलः सोम्य पुरुषः" इत्यस्य प्रकरणस्य सारः।
4. सुषुप्तौ मनसः लये, जीवस्य सत्सम्पत्तिः।
5. "कथमसतः सज्जायेत" इत्यस्य मन्त्रव्याख्यानम्।

**D) अधस्ताद् अनुप्रियमेकं अनुबध्नीत।** **10x1=10**

1. एकविज्ञानेन सर्वविज्ञानमिति प्रतिज्ञां समन्त्रं व्याख्यात।
2. "सदेव  सोम्येदमग्र आसीत्" इति मन्त्रभाष्यदिशा असत्कार्यवादं निराकृत्य सत्कारणपक्षं सोपपत्ति निरूपयत।

***

RKMVERI/DSP/MAIS/15-20/MT/D2019/SK-108

## SK-108 प्रश्नोपनिषत् शाङ्करभाष्यसहिता

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

**A) एकेन वाक्येन पदेन वा यथामति दश उत्तरत। 1x10 = 10**

1. यदि विज्ञास्यामः इत्यादिप्रयोगः किमर्थः ?
2. प्रश्नोपनिषदि आख्यायिका किमर्था ?
3. ब्रह्मपराः इत्यनेन किमभिप्रेतम् ?
4. के दक्षिणं प्रतिपद्यन्ते ?
5. सूर्यः अत्ता किमर्थम् ?
6. पितृयाणोपलक्षितः कः?
7. संवत्सरः कः?
8. भोक्ता कः?
9. अपरविद्यानुष्ठायिनां का गतिः?
10. सृज्यमानानां पतिः कः?
11. भोज्यभोक्त्रोः भेदः कीदृशः?
12. तान्ह स ऋषिरुवाच इत्यादिमन्त्रं पूरयत।

**B) सप्तसु पञ्च समाधत्त। 3x5= 15**

1. 'मन्त्रोक्तस्यार्थस्य विस्तरानुवादीदं ब्राह्मणमारभ्यते' इत्यस्य कः अभिप्रायः।
2. उत्तरमार्गावलम्बिनां का गतिः?
3. प्रजापतिव्रतस्य किं फलम्
4. अन्नस्य प्रजापतित्वं भाष्यदिशा साधयत
5. मासादौ प्रजापतिदृष्टिः कथं भवति
6. विश्वरूपं हरिणं जातवेदसम् - इति मन्त्रं पूरयित्वा भाष्यदिशा वर्णयत।
7. मन्त्रोद्धरणपुरःसरं प्राणस्य सर्वाश्रयत्वं वर्णयत।

**C) पञ्चसु त्रयं समाधत्त।** **5x3 = 15**

1. आदित्यस्य सर्वाधिष्ठानत्वं साधयत
2. कबन्धीप्रश्नं भाष्यदिशा वर्णयत।
3. सुकेशादीनां गुरूपसत्तिं वर्णयत।
4. अण्डोत्पत्तिक्रमेण सूर्याचनद्रमसावकल्पयत् - इति उत्पत्तिक्रमं वर्णयत।
5. सम्बत्सरादौ प्रजापतिदृष्टिः कथं भवति भाष्यदिशा वर्णयत।

**D) एकं यथायथं समाधत्त।** **10x1 = 10**

1. प्रथमप्रश्नं भाष्यानुसारं वर्णयत।
2. प्राणस्तुतिं यथोपनिषद्भाष्यं वर्णयत।

***

RKMVERI/DSP/MAIS/16-21/D2019/MT/SK-125

## SK-125 श्रीमद्भगवद्गीता २,३,४ अध्यायाः सशाङ्करभाष्याः

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

**A) यथाकामं दश प्रश्नान् उत्तरत। 1x10=10**

1. तृतीयाध्यायभूमिकाभाष्ये भगवत्पादैरुद्धृतं शुकानुशासनं किम्।
2. पूरयत – "त्यज धर्मम्... त्यज॥"
3. पूरयत – "संसारमेव... आश्रिताः॥"
4. पूरयत – "अदर्शनाद्... परिदेवना॥"
5. पूरयत – "अभ्युदयार्थोऽपि यः... फलाभिसन्धिवर्जितः।"
6. प्रजहाति यदा कामान् इत्यारभ्य आऽध्यायसमाप्तेः किम् बोधितम् भगवता।
7. आत्मदर्शने किं करणम्।
8. "उभयोरपि दृष्टोऽन्तः" – अन्तशब्दस्यात्र कोऽर्थः।
9. "अन्तवन्त इमे देहाः" – अन्तशब्दस्यात्र कोऽर्थः, तम् प्रति दृष्टान्तश्च कः।
10. "न जायते..." इत्यदिमन्त्रस्य काठकोपनिषत्पाठात् को भेदः।
11. अभिक्रमनाशस्य को दृष्टान्तो दर्शितो भाष्याकारभगवत्पादैः।
12. प्रत्यवायस्य को दृष्टान्तो दर्शितो भाष्यकारपादैः।

**B) यथारुचि पञ्च उत्तरत। 3x5=15**

1. "नायम् भूत्वा भविता वा न भूयः" इति भगवद्वाक्यस्य व्याख्यानं किम्।
2. आयासबाहुल्यकारणात् गृहस्थस्यैव मोक्षः स्यादिति मते कं दोषं वदन्ति भगवन्तो भाष्यकाराः।
3. मुमुक्षोः सर्वकर्मसंन्यासम् प्रति प्रमाणभूतानि शास्त्रवाक्यानि भाष्यकारैरात्तानि उद्धरन्तु।
4. प्रत्यवायविषयकम् भाष्यकारभगवत्पादीयम् मतं किम्।

5. द्वितीयाध्याये लौकिकन्यायावलम्बनं कुत्र भगवता कृतम्, तेन च ग्रन्थतात्पर्यं कथं न भग्नम्।
6. श्रौतैः स्मार्तैश्च गृहस्थस्यैव समुच्चयो मोक्षाय इति मते कथं दूषयन्ति भाष्यकारभगवत्पूज्यपादाः।
7. "कर्मणैव हि संसिद्धिमास्थिता जनकादयः" इति वाक्यस्य सिद्धान्तानुसारं कथं व्याख्यानम्।

**C) यथाच्छन्दं त्रीन् व्याख्यात। 5x3=15**

1. संन्यासेऽशक्तस्य अशुद्धसत्त्वस्य केन मार्गेण गीताशास्त्रानुसारम् परमपुरुषार्थो भवति।
2. तृतीयाध्यायारम्भेऽर्जुनस्य जातः पर्याकुलीभावः कीदृशः, तदनुरूपता च तत्र कृतस्य प्रश्नस्य कीदृशी।
3. "ननु विद्यापि अविदुष एव विधीयते, विदितविद्यस्य पिष्टपेषणवत् विद्याविधानानर्थक्यात्" – सप्रसङ्गं व्याख्यात।
4. "तत्र केचित् पण्डितम्मन्या वदन्ति – जन्मादिषड्भावविक्रियारहितः..." इत्यारब्धे भाष्यग्रन्थे कः पूर्वपक्षः काभिश्च युक्तिभिर्निरस्तः।
5. "सर्वकर्माणि मनसा..." इत्यादिश्लोकमाश्रित्य कर्मसंन्यासविषयका काः शङ्काः सम्भवन्ति, ताश्च कथं निरस्यन्ते सिद्धान्तिभिः।

**D) अनुप्रियमेकम् व्याख्यात। 10x1=10**

1. साङ्ख्यबुद्धेः यथाश्लोकं (गीताः ११-३०) सङ्क्षेपः क्रियताम्।
2. ज्ञानकर्मसमुच्चयवादविषयक(भाष्यकाराभीष्ट)सिद्धान्तपोषणाय "ज्यायसी चत् कर्मणस्ते मता बुद्धिः..." (गीता ३.१), "तदेकं वद निश्चित्य..." (गीता ३.२), "लोकेऽस्मिन् द्विविधा निष्ठा..." (गीता ३.३) इत्येतेभ्यो वाक्येभ्यः प्राप्ताः युक्तीरुल्लिख्य व्याख्यात।

***

RKMVERI/DSP/MAIS/16-21/D2019/MT/SK-132

**SK-132 ब्रह्मसूत्रशाङ्करभाष्यम्(1.3-4)**

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

**A) नीचैः दत्तेषु यथाकामं दश प्रश्नान् उत्तरत। 1x10=10**

1. मुक्तोपसृप्यं किम्?
2. द्युभ्वाद्यायतनं न प्रधानं,कुतः?
3. भूमाशब्दस्य अर्थः कः?
4. भूमाधिकरणस्य विषयवाक्यं किम्?
5. ईक्षतिकर्माधिकरणस्य पूर्वपक्षः कः?
6. अक्षराधिकरणस्य संशयः कः?
7. अम्बरान्तधृतिः परमेश्वरस्यैव कर्म, कुतः?
8. ब्रह्मसूत्रस्य तृतीयपादः किं प्रतिपादयितुम् आरभ्यते?
9. दहरः जीव एव इत्यत्र वाक्यशेषप्रमाणं किम्?
10. "अपि च स्मर्यते" इत्यत्र का स्मृतिः उदाहृता?
11. शास्त्रं मनुष्यानेव अधिकरोति, कुतः?
12. किमर्थं दहरशब्देन भूताकाशः नोच्यते?

**B) निम्नलिखितेषु यथारुचि पञ्च विव्रियन्ताम्। 3x5=15**

1. अन्यार्थश्च परामर्शः।
2. अन्यभावव्यावृत्तेश्च।
3. भूमा संप्रसादादध्युपदेशात्।
4. स्थित्यदनाभ्यां च।
5. नानुमानमतच्छब्दात्।
6. इतरपरामर्शात्स इति चेन्नासंभवात्।
7. हृद्यपेक्षया तु मनुष्याधिकारत्वात्।

**C) अत्र यथाच्छन्दं त्रयः समाधेयाः।** **5x3=15**

1. ईक्षतिकर्माधिकरणम्।
2. प्रमिताधिकरणम्।
3. अनुकृत्यधिकरणम्।
4. भूमाधिकरणम्।
5. अक्षराधिकरणम्।

**D) अधस्ताद् अनुप्रियमेकं अनुबध्नीत।** **10x1=10**

1. द्युभ्वाद्यधिकरणस्य तात्पर्यं तदधिकरणपठितसूत्राणां व्याख्यानपुरस्सरं सयुक्ति निरुपयत।
2. "दहरं पुण्डरीकं वेश्म" इत्यत्र परमेश्वर एव दहराकाशशब्दित इति दहराधिकरणोक्तदिशा समर्थयत।

***

RKMVERI/DSP/MAIS/16-21/MT/D2019/SK-133

## SK-133 ब्रह्मसूत्रभाष्य द्वितीयाध्याये प्रथमपादः (२.१,२,३)

कालावधिः - होरा पूर्णाङ्काः - 25

---

**A) यथेष्टं दशानां प्रश्नानाम् एकेन वाक्येन उत्तरं लिखत। 1x10=10**

1. ब्रह्मणः शारीरात्मना व्यपदेशः कया श्रुत्या?
2. कृत्स्नप्रसक्तिः निरवयवत्वशब्दकोपो वा इत्यत्र एकदेशिनां कः अभिप्रायः?
3. आत्मस्वरूपानुपमर्देन स्वाप्नसृष्टौ प्रमाणभूता श्रुतिः का?
4. अचेतनात् चेतनोत्पत्तौ कः दृष्टान्तः?
5. आकाशादिषु अनुवर्तमानः ब्रह्मस्वभावः कः?
6. योगेशास्त्रे तत्वदर्शनोपायः कः?
7. सांख्ययोगशब्दाभ्यां किं ग्राह्यम् इति शाङ्कराः मन्यन्ते?
8. कादृशाः तर्काः अप्रतिष्ठिताः भवन्ति?
9. अनन्यत्वं नाम किम्?
10. न कर्माविभागात् इति सूत्रार्थं लिखत।
11. सर्वधर्मोपपत्तेश्च सूत्रार्थं विवृणुत।
12. कीदृशं वैलक्षण्यं पूर्वपक्षिणा उच्यते।

**B) यथेष्टं पञ्चानाम् समाधानं कुरुत। 3x5=15**

1. कार्यस्य कारणानन्यत्वं दर्शयत।
2. अश्मादिवच्च तदनुपपत्तिः व्याख्यात।
3. देवादिवदपि लोके व्याख्यात।
4. आत्मनि चैवं विचित्राश्च हि इति सूत्रार्थं निरूपयत।
5. लोकवत्तु लीलाकैवल्यं प्रतिपादयत।
6. उपपद्यते चाप्युपलभ्यते निरूपयत।
7. शिष्टापरिग्रहाधिकरणमारचयत।

**C) यथेष्टं त्रयाणामुत्तरं लिखत ।** **5x3=15**

1. स्मृत्यधिकरणसारं लिखत।
2. भोक्त्रापत्यधिकरणसारं प्रतिपादयत।
3. वैषम्यनैर्घृण्याधिकरणसारं सिद्धान्तयत
4. कृत्स्नप्रसक्त्यधिकरणसिद्धान्तमारचयत।
5. उपसंहारदर्शनाधिकरणं व्याख्यात।

**D) एकस्योत्तरं लिखत** **10x1=10**

1. न विलक्षणत्वाधिकरणसारं संगृह्णीत।
2. सर्वोपेताधिकरणसारं संगृह्णीत।

***

RKMVERI/DSP/MAIS/15-20/D2019/MT/SK-135

**SK-135 ब्रह्मसूत्रभाष्यम्**

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

**A) नीचैः दत्तेषु यथाकामं दश प्रश्नान् उत्तरत। 1x10=10**

1. जैमिनीयमते कर्मफलदाता कः?
2. किं नाम संराधनम्?
3. "नेति नेति" इति श्रुत्यर्थे उभयप्रतिषेधो नोपपद्यते, कुतः?
4. का नाम सुषुप्तिः?
5. सन्ध्यमित्यस्य भाष्योक्तः अर्थः कः?
6. मायामात्रन्तु कात्स्न्र्येन ... इत्यत्र कात्स्न्र्यशब्देन किमभिप्रेतम्?
7. पूर्वपक्षिमते जीवस्य सुषुप्तिस्थानं किम्?
8. परस्य ब्रह्मणो देहादिषूपाधिष्वन्तरनुप्रवेशे श्रुतिप्रमाणं किम्?
9. ब्रह्मणः रूपद्वयं किम्?
10. मूर्छावस्थायाः कुत्र अन्तर्भावः?
11. कस्मात् कारणात् जीवः तिरस्कृतज्ञानैश्वर्यो भवति?
12. तदभावाधिकरणस्य संशयः कः?

**B) निम्नलिखितेषु यथारुचि पञ्च विव्रियन्ताम्। 3x5=15**

1. पूर्वं तु बादरायणो हेतुव्यपदेशात्।
2. तदव्यक्तमाह हि।
3. दर्शयति चाथो अपि स्मर्यते।
4. अरूपवदेव हि तत्प्रधानत्वात्।
5. अतः प्रबोधोऽस्मात्।
6. देहयोगाद्वा सोऽपि।
7. निर्मातारं चैके पुत्रादयश्च।

**C) अत्र यथाच्छन्दं त्रयः समाधेयाः।** **5x3=15**

1. तदभावाधिकरणम्।
2. कर्मानुस्मृत्यधिकरणम्।
3. मुग्धाधिकरणम्।
4. प्रकृतैतावत्वाधिकरणम्।
5. फलाधिकरणम्।

**D) अधस्ताद् अनुप्रियमेकं अनुबध्नीत।** **10x1=10**

1. उभयलिङ्गाधिकरणमाश्रित्य ब्रह्म सविशेषमुत निर्विशेषमिति विचार्य भाष्यदिशा एकदेशिमतानुसारमधिकरणभेदं निरूप्य तत्खण्डयत।
2. स्वप्ने रथादिसृष्टिः पारमार्थिकी उत मायामयीति सन्ध्यधिकरणपर्यालोचनया विचारयत।

***

RKMVERI/DSP/MAIS/17-22/D2019/MT/SK-151

## SK-151 पञ्चदशी(१ तः ५ अध्यायपर्यन्ता)

कालावधिः – होराद्वयम् पूर्णाङ्काः – 50

---

**A) यथेष्टं दशानां प्रश्नानाम् एकेन वाक्येन उत्तरं लिखत। 1x10=10**

1. समाधिलक्षणं किम्?
2. समाधेः नामान्तरं किम्?
3. अन्नमयकोशः कः?
4. भूमौ विद्यमानान् गुणभेदान् लिखत।
5. दशेन्द्रियाध्यक्षं किम्?
6. सात्त्विककर्मानुष्ठानफलं किं वर्तते।
7. श्रवणं नाम किम्?
8. मननलक्षणं किम्?
9. कस्मादुपदेशं लब्ध्वा जीवाः परां निर्वृतिं लभन्ते?
10. जीवाः कर्म किमर्थं कुर्वन्ति? भोगं च किमर्थमनुभवन्ति?
11. पञ्चदशीग्रन्थे कति प्रकरणानि सन्ति?
12. आरूणेः मतानुसारेण नामरूपाभ्यां व्याकृतमुत्पत्तेः पूर्वं किमासीत्?

**B) यथेष्टं पञ्चानाम् समाधानं कुरुत। 3x5=15**

1. अपञ्चीकृतपञ्चमहाभूतोत्पत्तिं वर्णयत।
2. सूक्ष्मशरीरोत्पत्तिं वर्णयत।
3. गुहाशब्दार्थं व्याख्यात।
4. पञ्चीकरणं वर्णयत।
5. अवस्थात्रये संविदः एकरूपतां गमयत।
6. निर्विकल्पसमाधेः स्वरूपं फलञ्च वर्णयत।
7. मङ्गलश्लोकं व्याख्यात।

**C) यथेष्टं त्रयाणामुत्तरं लिखत -** **5x3=15**

1. तत्वमसीति महावाक्यार्थं निरूपयत।
2. श्रवणादिसाधनलक्षणं प्रतिपादयत।
3. मनसः स्वरूपं वर्णयत।
4. पञ्चकोशानां स्वरूपं, तेभ्यः आत्मभेदं च प्रतिपादयत।
5. प्रकृतेः स्वरूपं वर्णयत।

**D) एकस्योत्तरं लिखत -** **10x1=10**

1. भागत्यागलक्षणया तत्वमसि महावाक्यार्थं वर्णय़त।
2. चतुर्णां महावाक्यानामर्थं यथाग्रन्थं विवेचयत।

***

RKMVERI/DSP/MAIS/16-21/D2019/MT/SK-164

## SK-164 वेदान्तपरिभाषा(आगमप्रयोजनपरिच्छेदौ)

समयावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

### A) यथेष्टं दशानां प्रश्नानाम् एकेन वाक्येन उत्तरं लिखत। 1x10=10

1. कीदृशं वाक्यं प्रमाणम्?
2. अजहल्लक्षणायाः लक्षणमुदाहरणञ्च लिखत।
3. शक्तिः नाम का?
4. प्रमाणानां प्रामाण्यं कतिविधम्? किंप्रकारकञ्च तत्?
5. अपौरूषेयत्वं नाम किम्?
6. प्रलयः कतिविधः? के च तद्विधाः?
7. वेदान्तानां किं प्रयोजनम्?
8. किं नाम कर्तृत्वम्?
9. मोक्षस्वरूपं किम्?
10. वेदान्तशास्त्रस्य विषयः कः?
11. चतुर्विधानि स्थूलशरीराणि कानि? सूक्ष्मशरीराणि च कानि?पञ्चीकरणं केषां न भवति?

### B) यथेष्टं पञ्चानाम् समाधानं कुरुत। 3x5=15

1. प्रयोजनस्वरूपं मोक्षलक्षणञ्च वर्णयत।
2. ज्ञानापरोक्षतां प्रतिपाद्य तत्वमस्यादिवाक्यात् संस्कृतान्तःकरणाद्वा भवति इति मतद्वयमुपस्थापयत।
3. आसत्तिलक्षणं निरूपयत।
4. योग्यतालक्षणं तत्त्वमसीति वाक्ये समन्वयीत।
5. तात्पर्यलक्षणं निर्धारयत।
6. वाक्यैकवाक्यतां पदैकवाक्यताञ्च निरूपयत।
7. वाक्यार्थज्ञाने कारणानि विचार्य शमादीनां लक्षणानि लिखत।

**C) यथेष्टं त्रयाणामुत्तरं लिखत -** **5x3=15**

1. मोक्षसाधनमुक्त्वा ज्ञानस्वरूपं श्रुत्या प्रमाणीकुरुत।
2. शास्त्रदृष्टिसूत्रार्थं कल्पतरूकारकृतां कारिकामुद्धृत्य उपोद्बलयत।
3. श्रवणादि साधनलक्षणं निरूपयत।
4. वेदानामनित्यत्वं पौरूषेयत्वापौरूषेयत्वविचारञ्च व्यवस्थापयत।
5. आकांक्षालक्षणं स्वरूपञ्च विचारयत।

**D) एकस्योत्तरं लिखत -** **10x1=10**

1. श्रवणादीनामङ्गाङ्गिभावं विचारयत।
2. लक्षणात्रैविध्यं सोदाहरणं प्रतिपाद्य, तत्वमसीति वाक्यार्थबोधे लक्षणायाः अनुपयोगितां गमयत।

***

RKMVERI/DSP/MAIS/15-20/D2019/MT/SK-167

**SK-167 सिद्धान्तलेशसंग्रहः**

कालावधिः - होराद्वयम्　　　　　　　　　　पूर्णाङ्काः - 50

---

**A) नीचैः दत्तेषु यथाकामं दश प्रश्नान् उत्तरत।　　　　1x10=10**

1. वाचस्पतिमिश्रमते जगदुपादानकारणं किम्?
2. परिसंख्याविधेरुदाहरणं किम्?
3. नियमविधेः लक्षणं किम्?
4. "अनात्मदर्शनेनैव परमात्मानमुपास्महे" कस्य वचनमिदम् ?
5. मेघाकाशतुल्यो धीवासनाप्रतिबिम्बः कः?
6. अपूर्वविधिपक्षे भाष्यकारसम्मतिप्रदर्शकं वाक्यं किम्?
7. चैतन्यस्य चातुर्विध्यं कस्मिन्ग्रन्थे प्रोक्तम्?
8. जन्मादिलक्षणत्रयमपि परस्परनिरपेक्षमिति कस्य मतम् ?
9. शब्दात् निर्विचिकित्सं परोक्षज्ञानमेवोत्पद्यते, कस्य मते?
10. अनन्यव्यापारत्वस्य मुक्त्युपायत्वे श्रुतिप्रमाणं किम्?
11. परमात्मन अधिदैवतं त्रीणि रूपाणि कानि ?
12. शुद्धं ब्रह्म उपादानमिति कस्य मते ?

**B) निम्नलिखितेषु यथारुचि पञ्च विव्रियन्ताम्।　　　　3x5=15**

1. विवर्तपरिणामयोः लक्षणविचारः।
2. वेदान्तश्रवणे प्रकटार्थकारस्य मतम्।
3. परिसंख्याविधेः स्वरूपम्।
4. श्रवणादौ विध्यभावपक्षः।
5. ब्रह्मलक्षणविचारे कौमुदीकाराणां पक्षः।
6. मायोपादानत्वविचारे संक्षेपशारीरककृन्मतम्।
7. अवच्छेदप्रतिबिम्बरहितं ब्रह्म जीव इति मतम्।

**C) अत्र यथाच्छन्दं त्रयः समाधेयाः।** **5x3=15**

1. श्रवणविधिवाक्ये अन्यमतनिराकरणपूर्वकं वाचस्पतिमतं विवृणुत।।
2. मायोपादानत्वविचारं सप्रमाणं कुरुत।
3. जीवव्यावृत्तस्य ईश्वरस्य जगदुपादानत्वमिति निरूपयत।
4. जीवेश्वरयोः प्रतिबिम्बत्वं नानाविधं पक्षमाश्रित्य साधयत।
5. चैतन्यस्य चातुर्विध्यं परिकल्प्य जीवेश्वरविभागः।

**D) अधस्ताद् अनुप्रियमेकं अनुबध्नीत।** **10x1=10**

1. श्रवणवाक्ये परिसंख्याविधिपक्षं दूषयित्वा नियमविधिपक्षं सप्रमाणं साधयत।
2. ब्रह्मलक्षणमधिकृत्य यथाग्रन्थं लघूपन्यासं कुरुत।

***

RKMVU/DSP/MAIS/15-20/D2019/MT/SK-171

**SK-171 अद्वैतसिद्धिः (आदितः दृश्यत्वान्तः भागः)**

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

**A) यथाकामं पञ्च प्रश्नान् उत्तरत। 1x5=5**

1. किं नाम असत्त्वम्?
2. विप्रतिपत्तेः विचाराङ्गत्वं कथम्?
3. ज्ञाननिवर्त्यत्वम् इत्युक्ते किम्?
4. ब्रह्मप्रमातिरिक्ताऽबाध्यत्वे सति इति दलस्यावश्यकता का?
5. व्यावहारिकत्वमित्युक्ते किम्?
6. प्रथममिथ्यात्वलक्षणं किम्?
7. पञ्चपादिका विवरणस्य कर्ता कः?

**B) वाक्येनैकेन पञ्चानाम् उत्तरं लिखत। 1x5=5**

1. न्यायदीपावलिकर्तृमते मिथ्यात्वलक्षणं किम्?
2. अभावस्य तात्विकत्वे कः दोषः?
3. जल्पस्य किं लक्षणम्?
4. निषेधस्य निषेधे प्रतियोगिसत्त्वं कुत्र?
5. "असदेवेदमग्र आसीत्" - इत्यत्र नञा किं प्रतिपाद्यते?
6. वादस्य किं लक्षणम्।
7. सिद्धान्ते प्रातिभासिकस्थले शुक्तिरजतदृष्टान्ते निषेधप्रतियोगि किम्?

**C) यथारुचि पञ्च समाधत्त। 3x5=15**

1. मोक्षं प्राप्त इव स्वयं विजयते। विवृणुत।
2. सदसत्त्वानधिकरणत्वम् इत्येतत् समासानुगुणं निरूपयत।
3. उपपादनं च स्वपक्षसाधनपरपक्षनिराकरणाभ्यां भवति।
4. तृतीयमिथ्यात्त्वलक्षणे पूर्वपक्षं संगृह्णीत।
5. प्रमाणत्वञ्च दोषाऽसहकृतज्ञानकरणत्वम्।

6. पक्षतावच्छेदकविचारं संगृह्णीत।

7. द्वितीयमिथ्यात्वविचारे पूर्वपक्षमारचयत।

8. सत्प्रतियोगिकासत्प्रतियोगिकभेदद्वयं वा साध्यम् इति विषयं व्याख्यात।

**D) यथाच्छन्दं त्रयः समाधेयाः।** **5x3=15**

1. यावत्सदधिकरणकात्यन्ताभावप्रतियोगित्वमित्यादि लक्षणपरिष्कारं दर्शयत।।

2. विप्रतिपत्तेः विचाराङ्गत्वं साधयत।

3. पञ्चममिथ्यात्वविचारः।

4. मङ्गलाचरणं व्याख्यात।

5. पक्षता विषयं व्याख्यात।

**E) अनुप्रियमेकम् अनुबध्नीत।** **10x1=10**

1. प्रथममिथ्यात्वलक्षणस्य सारं संगृह्णीत।

2. चतुर्थमिथ्यात्वलक्षणस्य सविस्तरं विचारं कुरुत।

***

RKMVERI/DSP/MAIS/15-20/D2019/MT/SK-282

## SK-182 पञ्चपादिका वर्णकद्वयान्ता

कालावधिः – होराद्वयम् पूर्णाङ्काः – 50

---

**A) यथेष्टं दशानां प्रश्ननानाम् एकेन वाक्येन उत्तरं लिखत। 1x10=10**

1. नमाम्यभोगि.....।
2. अनर्थहेतुनिबर्हणं किं सूत्रितम्?
3. अनर्थः कः?
4. जरद्गवागि वाक्यं किम्?
5. अध्यासः सूत्रकृता कुत्र प्रतिपादितः?
6. तमःप्रकाशयोकरित्यत्र विरोधः सिद्धान्तनये कीदृशः?
7. आत्मनः धर्माः के?
8. मिथ्येति भवितुं युक्तमित्यत्र मिथ्याशब्दः किंवचनः?
9. मिथ्याज्ञाननिमित्तः इत्यत्र निमित्तशब्दार्थः कः?
10. पञ्चपादिकोक्तं स्मृतिलक्षणं किम्?
11. पञ्चपादिकोक्तमध्यासलक्षणं किम्?
12. नैसर्गिकः इत्यस्य कःअर्थः?

**B) यथेष्टं पञ्चानाम् समाधानं कुरुत। 3x5=15**

1. प्रत्यक्षाभिमतेनाबाधितकल्पेन शासत्रस्य ऐदम्पर्यं विरूध्यते न वा इति विचारयत।
2. भाष्यकारः अध्यासं किमर्थमादौ प्रतिपादयति।
3. विषयविषयिणोः स्वतः परतो वा इतरेतरात्मत्वं न संगच्छते इति प्रतिपादयत।
4. मिथ्याज्ञानशब्दार्थं विवृणुत।
5. शुक्तौ प्रतिपन्नरजतस्य पारमार्थिकत्वं निरस्यत।
6. अध्यस्य इत्यत्र क्त्वा प्रत्ययस्वारस्यं गमयत।
7. आनन्दादीनां चैतन्यधर्मत्वं किमर्थं प्रतिपाद्यते इति विषयं विशदयत।

**C) यथेष्टं त्रयाणामुत्तरं लिखत -** **5x3=15**

1. स्वाप्नसृष्टेः दोषत्रितयजन्यत्वमध्यासाधिष्ठानत्वञ्च वर्णयत।
2. विषयविषयिणोः कीदृशः विरोधः अभिप्रेतः इति विचारयत।
3. शिष्टाग्रणीः भाष्यकारः इति विषयं प्रतिपादयत।
4. प्रथमसूत्रेण सूत्रिते विषयप्रयोजने इति यथापञ्चपादिकां प्रतिपादयत।
5. पञ्चपादिकाकाराणां शैलीगतानि वैशिष्ट्यानि समालोचयत।
6. अख्यातिवादिमतमुपस्थाप्य स्मरणाभिमानप्रमोषवादं निराकुरुत।

**D) एकस्योत्तरं लिखत -** **10x1=10**

1. मंगलश्लोकान् व्याख्यात।
2. युष्मदस्मदित्याद्यारभ्य मिथ्याभवितुं युक्त इत्यन्तपञ्चपादिकाव्याख्यानस्य सारमालोचयत।

***

RKMVERI/DSP/MAIS/17-22/D2019/MT/SK-201

**SK-201 सिद्धान्तकौमुद्याम् आदितः पञ्चसन्ध्यन्तो भागः**

समयावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

**A) यथेष्टं दशानां प्रश्ननाम् उत्तरं लिखत।** **1x10=10**

1. माहेश्वराणि इति पदस्य विग्रहं कुरुत।
2. उ इति कतिवर्णानां संज्ञा।
3. तपरः इति पदस्य विग्रहं लिखन्तु।
4. इण् इति प्रत्याहारः पूर्वणकारेण भवति न वा।
5. चादयः इत्यस्य विग्रहं प्रदर्शयन्तु।
6. षस्य आभ्यन्तरप्रयत्नं लिखत।
7. अण् इति प्रत्याहारः पूर्वणकारेण भवति परेण वा।
8. लघुसंज्ञाविधायकं सूत्रं लिखत।
9. गुणसंज्ञाविधायकं सूत्रं लिखत।
10. संहितासंज्ञाविधायकं सूत्रं लिखन्तु।
11. पदसंज्ञाविधायकं सूत्रं लिखत।
12. ऋत् इति कतिवर्णानां संज्ञा।

**B) यथारुचि पञ्च समाधत्त।** **3x5=15**

1. मध्वरिः इति प्रयोगं साधयत।
2. सच्चित् इति प्रयोगं निरूपयत।
3. गङ्गे अमू इति प्रयोगं साधयत।
4. विष्णुस्त्राता इति प्रयोगं साधयत।
5. उपेन्द्रः इति प्रयोगं साधयत।
6. पुना रमते इति प्रयोगं साधयत।
7. वाग्घरिः इति प्रयोगं साधयत।

**C) यथेष्टं त्रयाणामुत्तरं लिखत।** **5x3=15**

1. वृद्धिरादैच् इति सूत्रस्य व्याख्यानं कुरुत।
2. बाह्यप्रयत्नानां निरूपणं कुरुत।
3. हलन्त्यम् इति सूत्रं सोदाहरणं व्याख्यात।
4. आदिरन्त्येन सहेता इति सूत्रं व्याख्यात।
5. उपदेशेऽजनुनासिक इत् इति सूत्रं व्याख्यात।

**D) एकस्योत्तरं लिखत।** **10x1=10**

1. ऊकालोऽज्झस्वदीर्घप्लुतः इति सूत्रं विस्तरेण प्रतिपादयत।
2. वर्णसमाम्नाये हकारद्वयपाठस्य सोदाहरणं प्रयोजनं लिखत।

***

RKMVERI/DSP/MAIS/17-22/D2019/MT/SK-205

**SK-205 सिद्धान्तकौमुदी(अजन्तभागः)**

समयावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

**A) यथेष्टं दशानां प्रश्ननानाम् एकेन वाक्येन उत्तरं लिखत-** 1x10=10

1. समासग्रहणं नियमार्थम्। कः नियमः ?
2. 'जस्' इत्यत्र जकारस्य इत्संज्ञा केन सूत्रेण ?
3. सम्बुद्धिसंज्ञाविधायकं सूत्रं किम् ?
4. तस्माच्छसो नः पुंसि। कस्मात् ?
5. अट्कुप्वाङ्नुमित्यत्र आङ्ग्रहणं किमर्थम् ?
6. सन्निपातपरिभाषायाः अनित्यत्वस्य ज्ञापकः कः ?
7. आदेशप्रत्यययोः इत्यत्र कस्मात् सः इत्यनुवर्तते ?
8. उभशब्दस्य सर्वादिगणे पाठः किमर्थः?
9. सर्वादिगणे तुल्यपर्यायस्य समशब्दस्य ग्रहणं कुतः न ?
10. व्यवस्था नाम का ?
11. न बहुव्रीहौ इत्यस्य कोऽर्थः ?
12. विभाषा जसि इत्यस्य कोऽर्थः ?

**B) यथेष्टं पञ्चानां प्रश्ननानाम् उत्तरं लिखत-** **3*5=15**

1. अत एव सः सि इति तादेशः आरभ्यते।
2. 'तदन्तस्यापीयं संज्ञा।' का ? कथम् ?
3. सर्वनाम्नो विहितस्य सुडिति व्याख्यातत्वात्। विशदयत।
4. रामाणाम्। ससूत्रं रुपं साधयत।
5. रामेषु। ससूत्रं रुपं साधयत।
6. सर्वेषाम्। ससूत्रं रुपं साधयत।
7. निर्जरसौ।ससूत्रं रुपं साधयत।

**C) यथेष्टं त्रयाणां प्रश्नानाम् उत्तरं लिखत-** **5*3=15**

1. आदेशप्रत्यययोः। वर्णयत।
2. एङ्ह्रस्वात्संबुद्धेः। निरूपयत।
3. बहुवचने झल्येत्। विवृणुत।
4. पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम्।व्यख्यात।
5. द्वन्द्वे च। प्रपञ्चयत।

**D) एकस्योत्तरं लिखत -** **10x1=10**

1. उभ-उभयशब्दयोः सर्वादिगणे पाठप्रयोजनचर्चां वर्णयत।
2. जरायाः जरसन्यतरस्याम्। प्रतिपादयत।

***

RKMVU/DSP/MAIS/18-23/D2019/MT/SK-209

**SK-209 वैयाकरणसिद्धान्तकौमुद्यां कारकप्रकरणम्।**

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

**A) यथाकामं दश प्रश्नान् उत्तरत। 1x10=10**

1. जपम् अनु प्रावर्षत् इत्यत्र अनु इत्यनेन किं द्योत्यते?
2. अलिङ्गाः शब्दाः कस्य उदाहरणम्?
3. व्यवस्थितविभाषा नाम किम्?
4. कर्मप्रवचनीयसंज्ञा कस्याः संज्ञायाः अपवादः?
5. “हीने” इति सूत्रार्थं लिखत।
6. राजा पुरं वसेत् इत्यत्र द्वितीया कथम्?
7. गतिबुद्धिसूत्रे कीदृशम् अकर्मकत्वम् इष्टम्?
8. अभिनिविशश्च इति कस्य अपवादः?
9. कः अकर्मकः धातुः?
10. बुभुक्षितं न प्रतिभाति किञ्चित् अत्र द्वितीया कथम्?
11. नदीमन्ववसिता सेना अत्र कः धातुः कश्च प्रत्ययः।
12. “तृतीयार्थे” इत्यत्र तृतीयार्थः कः?

**B) यथारुचि पञ्च समाधत्त। 3x5=15**

1. “नीवह्योर्न” इति वार्तिकं व्याख्यात।
2. “अधिशीङ्स्थासां कर्म” इति सूत्रं व्याख्यात।
3. प्रातिपदिकार्थसूत्रे वचनग्रहणं किमर्थम्।
4. "अकर्मकधातुभिर्योगे इत्यादि वार्तिकार्थं सोदाहरणं लिखत।
5. उपोऽधिके च इति सूत्रं व्याख्यात।
6. तिङा कथम् अभिधानं भवति इति वर्णयत।
7. कर्तुरीप्सिततमं कर्म इत्यत्र कर्मग्रहणं किमर्थम्।

**C) यथाच्छन्दं त्रयः समाधेयाः।** **5x3=15**

1. लिङ्गमात्राधिक्ये प्रथमा इति वर्णयत।
2. कालाध्वनोरत्यन्तसंयोगे इति सूत्रं व्याख्यात।
3. "तथायुक्तं चानीप्सितम्" इति सूत्रं व्याख्यात।
4. "साधकतमं करणम्" इति सूत्रं व्याख्यात।
5. "अनुर्लक्षणे" इति सूत्रं व्याख्यात।

**D) अनुप्रियमेकम् अनुबध्नीत।** **10x1=10**

1. कर्तुरीप्सिततमं कर्म इति सूत्रं विस्तरेण व्याख्यात।
2. उपान्वध्याङ्वसः इति सूत्रं व्याख्यात।

***

RKMVERI/DSP/MAIS/16-21/J2019/MT/SK-215

**SK-215 सिद्धान्तकौमुद्याम् एकशेषात् समासाश्रयं यावत् स्त्रीप्रत्ययश्च**

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

**A) यथाकामं दश प्रश्नान् उत्तरत। 1x10=10**

1. कन्याशब्दस्य ङीप् कुतो न?
2. यकपूर्वायाः इति स्त्रीत्वनिर्देशः कुतः?
3. भस्त्रैषाजाज्ञाद्वासा नञ्पूर्वाणामपि इति सूत्रे भस्त्राग्रहणं किमर्थम्?
4. वृषलस्य पत्नी इति व्यस्ते नत्वं कथम्?
5. औपगवी इत्यत्र कः स्त्रीप्रत्ययः केन च?
6. 'इयं त्रिसूत्री पुंयोग एवेष्यते' त्रिसूत्री का?
7. वृषाकपीशब्दस्य अर्थं लिखत।
8. षित्त्वादेव सिद्धे मातामहीशब्दस्य गौरादिगणे पाठः कुतः?
9. पद्धती इत्यत्र पद्भावः कथम्?
10. अरण्यानी इत्यस्य अर्थः कः?
11. जातेः इत्यनुवृत्तावपि इतो मनुष्यजातेः इत्यत्र जातिग्रहणं किमर्थम्?
12. जानपदकुण्ड… इत्यादि सूत्रं पूरयत।
13. अलाबू इत्यस्य दीर्घान्तत्वेऽपि ऊङ् किमर्थम्?

**B) यथाकामं पञ्चानाम् उत्तरं लिखत 3x5=15**

1. वयसि प्रथमे इति सूत्रं व्याख्यात।
2. अन्तर्वत्पतिवतोर्नुक् इति सूत्रं व्याख्यात।
3. मनोः स्त्रीत्वे कति रूपाणि भवन्ति?
4. बहुव्रीहेश्चान्तोदात्तात् इति सूत्रं व्याख्यात।
5. ऊङुतः इति सूत्रं व्याख्यात।
6. दामहायनान्ताच्च इति सूत्रं व्याख्यात।

7. पुंयोगादाख्यायाम् इति सूत्रं व्याख्यात।

**C) यथाकामं त्रयमुत्तरत।** **5x3=15**

1. वर्णादनुदात्तात्तोपधात्तो न इति सूत्रं सवार्तिकं व्याख्यात।
2. अजाद्यतष्टाप् इति सूत्रं व्याख्यात।
3. इन्द्रवरुण... इत्यादि सूत्रं प्रपूर्य सवार्तिकं व्याख्यात।
4. उगितश्च इति सूत्रं व्याख्यात।
5. वोतो गुणवचनात् इति सूत्रं व्याख्यात।

**D) यथारुचि एकं समाधत्त।** **10x1=10**

1. जातेरस्त्रीविषयादयोपधात् इति सूत्रं व्याख्यात।
2. स्वाङ्गाच्चोपसर्जनादसंयोगपधात् इति सूत्रं व्याख्यात।

***

RKMVERI/DSP-WW/MAIS/16-21/D2019/MT/SK-215

**SK-215 सिद्धान्तकौमुद्यामेकशेषात्समासाश्रयं यावत्, स्त्रीप्रत्ययश्च**

समयावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

**A) यथेष्टं दशानां प्रश्नानाम् उत्तरं लिखत। 1x10=10**

1. वृत्तिलक्षणं लिखत।
2. अव्ययीभावलक्षणं लिखत।
3. समासः कतिविधः।
4. तत्पुरुषलक्षणं लिखत।
5. सुपां सुपा इत्यस्य उदाहरणं लिखत।
6. द्वन्द्वलक्षणं लिखत।
7. लौकिकविग्रहस्य लक्षणं लिखत।
8. अविग्रहः समासः कः।
9. विग्रहः कः।
10. तिङां तिङा इत्यस्य उदाहरणं लिखत।
11. सूपप्रति इत्यत्र कः समासः।
12. द्वित्राः इत्यत्र कः समासः।

**B) यथारुचि पञ्च समाधत्त। 3x5=15**

1. प्रतिलोमम् इति प्रयोगं ससूत्रं साधयत।
2. ब्रह्मवर्चसम् इति प्रयोगं ससूत्रं लिखत।
3. अनुरहसम् इति प्रयोगं ससूत्रं साधयत।
4. अपथम् इति प्रयोगं ससूत्रं लिखन्तु।
5. अनूपः इति प्रयोगं ससूत्रं साधयन्तु।
6. पञ्चनदम् इति प्रयोगं ससूत्रं साधयत।
7. कृष्णभूमः इति प्रयोगं ससूत्रं विलिखत।

**C) यथेष्टं त्रयाणामुत्तरं लिखत।** **5x3=15**

1. वृद्धो यूना तल्लक्षणश्चेदेव विशेषः इति सूत्रं व्याख्यात।
2. स्त्री पुंवच्च इति सूत्रं सोदाहरणं निरूपयत।
3. नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्याम् इति सूत्रं प्रतिपादयत।
4. द्व्यन्तरुपसर्गेभ्योऽप ईत् इति सूत्रं व्याख्यात।
5. न पूजनात् इति सूत्रं सोदाहरणं विशदयत।

**D) एकस्योत्तरं लिखत।** **10x1=10**

1. ऋक्पूरब्धूःपथामानक्षे इति सूत्रं सोदाहरणं व्याख्यात।
2. त्यदादीनि सर्वैर्नित्यम् इति  सूत्रं सोदाहरणं सवार्तिकं वर्णयत।

***

RKMVERI/DSP/MAIS/16-21/D2019/MT/SK-227

# SK-227 सिद्धान्तकौमुद्यां पूर्वकृदन्तप्रकरणम्

समयावधिः-होराद्वयम् सत्रम् ७ पूर्णाङ्काः-५०

---

## A) दश समाधेयाः १ x १० = १०

1. अचो यत् इति सूत्रम् अनपेक्षितम् - कथम्?
2. आङो यि इति सूत्रस्य कोऽर्थः?
3. हलश्चेजुपधात् इति सूत्रस्य कोऽर्थः?
4. शक्यम् इत्यत्र कः प्रत्ययः केन सूत्रेण?
5. ब्रह्मभूयम् इत्यस्य कोऽर्थः?
6. वृत्यः इत्यत्र कः प्रत्ययः?
7. चजोः कु घिण्ण्यतोः इति सूत्रस्यार्थं लिखत।
8. ज्वलितिकसन्तेभ्यो णः इत्यत्र इतिशब्दस्य कोऽर्थः?
9. पादहारक इत्यत्र कः विग्रहः?
10. विभाषा कृवृषोः इति सूत्रस्यार्थम् उदाहरणं च लिखत।
11. प्रज्ञ इत्यत्र कः प्रत्ययः?
12. पाघ्राध्माधेट्दृशः कः प्रत्ययः भवति, किञ्च उदाहरणम्?

## B) यथाभीष्टं पञ्चानाम् उत्तरं लिखत ३ x ५ = १५

1. श्याद्व्यधास्रु इत्यादि सूत्रं व्याख्यात।
2. उपसर्या काल्या प्रजने इतीदं सूत्रं व्याख्यात।
3. दुन्योरनुपसर्गे इतीदं सूत्रं व्याख्यात।
4. एतिस्तुशास्वृदृजुषः क्यप् इतीदं सूत्रं व्याख्यात।
5. इगुपधज्ञाप्रीकिरः कः इतीदं सूत्रं व्याख्यात।
6. गाथक इति साधयत।
7. कृत्यल्युटो बहुलम् इति सूत्रे योगविभागं वर्णयत।

**C) यथाभीष्टं त्रीणि समाधत्त** ५ x ३ = १५

1. स्त्र्यधिकारादूर्ध्वं वासरूविधिः क्वचिन्न इति निरूपयत।
2. राजसूयसूर्येत्यादिसूत्रं व्याख्यात।
3. नन्दिग्रहिपचादिभ्यो लुणिन्यचः इतीदं सूत्रं व्याख्यात।
4. शप्रत्ययविधानं वर्णयत।
5. णप्रत्ययविधानं वर्णयत।

**D) एकम् उत्तरयत** १० x १ = १०

1. वासरूपोऽस्त्रियाम् इति सूत्रं व्याख्यात।
2. कृत्यप्रत्ययान् विवृणुत।

***

RKMVERI/DSP-WW/MAIS/16-21/D2018/MT/SK-227

**SK-227 सिद्धान्तकौमुद्याम् कृत्यप्रकरणात् पूर्वकृदन्तप्रकरणं यावत्**

समयावधिः - होराद्वयम् पूर्णाङ्काः -50

---

**A) यथेष्टं दशानां प्रश्ननाम् एकेन वाक्येन उत्तरं लिखत। 1x10=10**

1. वृत्तिकारमते केलिमर-प्रत्ययाः कस्मिन्नर्थे भवन्ति।
2. कृत्यचः इति सूत्रस्य अर्थं लिखत।
3. प्रणिंसितव्यम् इत्यत्र णत्वं कथम्।
4. आलम्भ्य इत्यत्र नुम् कथम्।
5. गदमदचर...इति सूत्रे यमग्रहणं किमर्थम्।
6. आत्मनाम...इत्यादिश्लोकं पूरयत।
7. कुप्यं नाम किम्।
8. गमेरिट् परस्मैपदेषु इत्यत्र परस्मैपदग्रहणं किं लक्षयति।
9. पचादिराकृतिगणः इत्यत्र प्रमाणं किम्।
10. खशोऽन्यत्र नेष्यते इति कस्य मतम्।
11. शोकापनोदः नाम कः।
12. गिरिशमुपचचार इत्यत्र लोके गिरिशम् इति प्रयोगः कथम्।

**B) यथेष्टं पञ्चानां प्रश्ननानां व्याख्यानं कुरुत। 3x5=15**

1. लभ्यम् इति रूपं साधयत।
2. अर्यः स्वामिवैश्ययोः इति सूत्रं व्याख्यात।
3. मार्ग्यः इति रूपं साधयत।
4. अजर्यं संगतम् इति सूत्रं व्याख्यात
5. कर्ता इति रूपं साधयत।
6. शिल्पिनि ष्वुन् इति सूत्रं व्याख्यात।
7. भिक्षासेनादायेषु च इति सूत्रं व्याख्यात।

**C) यथेष्टं त्रयाणां प्रश्नानाम् उत्तरं लिखत।** **5x3=15**

1. इजादेः सनुमः इति सूत्रं पूरयित्वा व्याख्यात।
2. राजसूय...इति सूत्रं पूरयित्वा व्याख्यात।
3. पाय्यसान्नाय्य.....इति सूत्रं पूरयित्वा व्याख्यात।
4. सुपि स्थः इति सूत्रं व्याख्यात।
5. टप्रत्ययविधायकानि सूत्राणि व्याख्यात।

**D) यथेष्टम् प्रश्नमेकम् उत्तरत।** **10x1=10**

1. वासरूपोऽस्त्रियाम् इति सूत्रं समाश्रित्य लघुप्रबन्धं लिखत।
2. नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः इति सूत्रं व्याख्यात।

***

RKMVERI/DSP/MAIS/19-24/D2019/MT/SK-236

**SK-236 लघुसिद्धान्तकौमुदी अजन्तपुंलिङ्गान्ता**

समयः - होराद्वयम् पूर्णाङ्काः - ५०

---

**A) यथाकामं सप्तदशसु पञ्चदश समाधेयाः। १*१५=१५**

1. लघुसिद्धान्तकौमुद्याः मङ्गलाचरणं किम्?
2. उपदेशपदस्य कः अर्थः?
3. प्रत्याहारसंज्ञाविधायकं सूत्रं किम्?
4. अणुदित्सूत्रे अण् इत्यनेन केषां वर्णानां ग्रहणम्?
5. सवर्णसंज्ञाविधायकं सूत्रं किम्?
6. संयोगसंज्ञाविधायकं सूत्रं किम्?
7. पूर्वत्रासिद्धम् इति शास्त्रेण किमसिद्धम्?
8. अयादिसन्धिविधायकं सूत्रं किम?।
9. गुणपदेन केषां वर्णानां ग्रहणम्?
10. वृद्धिसन्धिविधायकं सूत्रं किम्?
11. अचो रहाभ्यां द्वे इति सूत्रस्य अर्थं लिखत।
12. तपरस्तत्कालस्य इति सूत्रस्य अर्थं लिखत।
13. धात्त् र् अंश इत्यत्र रेफस्य लोपो भवति न वा? किं प्रमाणम्?
14. यरोऽनुनासिकेऽनुनासिको वा इति सूत्रस्य अर्थं लिखत।
15. ष्टना ष्टुः इति सूत्रेण किं भवति?
16. खरि च इति सूत्रस्य अर्थः कः?
17. ओमाङोश्च इति सूत्रं कस्य अपवादः?

**B) सप्तसु यथाकामं पञ्च समाधेयाः। ३*५=१५**

1. आदिरन्त्येन सहेता इति सूत्रे संज्ञासंज्ञिनिर्देशः कार्यः।
2. वर्णानामुच्चारणस्थानानि लिखत।

3. गवाग्रम् इति रूपं साधयत।

4. सर्वत्र विभाषा गोः इत्यत्र वृत्तौ एङन्तस्य इति किमर्थं वक्तव्यम्?

5. के प्रादयः?

6. झलां जशोऽन्ते इत्यस्य फलं विशिष्टतया कुत्र भाति?

7. टि इत्येतत् किम्?

**C) यथेच्छं त्रिषु द्वयं समाधत्त।** ५*२=१०

1. तुल्यास्यप्रयत्नं सवर्णम् इति सूत्रं व्याख्यात।

2. सुद्ध्युपास्यः इति रूपं साधयत।

3. स्तोः श्चुना श्चुः इति सूत्रं व्याख्यात।

**D) यथेच्छमेकमुत्तरत।** १०*१=१०

1. अणुदित्सवर्णस्य चाप्रत्ययः इति सूत्रं व्याख्यात।

2. निपात एकाजनाङ् इति सूत्रं व्याख्यात।

***

RKMVERI/DSP/MAIS/18-23/D2019/MT/SK-239

**SK-239 लघुसिद्धान्तकौमुद्यां कृत्तद्धितौ।**

समयः - होराद्वयम् पूर्णाङ्काः - ५०

---

**A) यथेच्छं दश प्रश्नाः समाधेयाः।** **१ x १० = १०**

3. कृत्प्रत्ययः कस्मिन्नर्थे विहितः?
4. षः प्रत्ययस्य इति सूत्रस्यार्थः कः?
5. धातोरिति अधिकारः कियत्?
6. दाम्नी......... इति सूत्रं पूरयत।
7. करणे यजः इति सूत्रार्थः कः?
8. ज्ञः इत्यत्र कः प्रत्ययः?
9. लवित्रम् इत्यत्र कः प्रत्ययः?
10. राजयुध्वा इत्यत्र कः प्रत्ययः?
11. दृढः इति शब्दः कस्मिन् अर्थे निपात्यते।
12. निष्ठासंज्ञा केषाम् ?
13. विद्वान् इत्यत्र कः प्रत्ययः?
14. दात्रमित्यत्र कः प्रत्ययः?

**E) यथाकामं त्रीन् प्रश्नान् उत्तरत।** **३ x ५ = १५**

1. पारदृश्वा इति रूपं साधयत।
2. सोमयाजी इति रूपं साधयत।
3. ऋहलोर्ण्यत् इति सूत्रं व्याख्यात।
4. प्रियंवदः इति रूपं साधयत।
5. कुम्भकारः इति रूपं साधयत।
6. कथम् प्रथमासामानाधिकरण्ये शतृशानचौ भवतः?
7. आत्ममाने खश्च इति सूत्रं वर्णयत।

**F) पञ्चसु त्रयं समाधत्त।** **५ x ३ = १५**

1. लटः शतृशानचावप्रथमासमानाधिकरणे।
2. कृत्यल्युटो बहुलम्
3. वाऽसरूपोऽस्त्रियाम्।
4. लृटः सद्वा।
5. सत्संज्ञा।

**G) द्वयोरेकं समाधत्त।** **१० x १ = १०**

1. निष्ठातकारस्य नकारविधायकानि सूत्राणि प्रतिपादयत।
2. कृत्यप्रत्ययान् विवृणुत।

***

RKMVERI/DSP-WW/MAIS/18-23/D2019/MT/SK-239

# SK-239 लघुसिद्धान्तकौमुद्यां कृत्तद्धितौ

समयावधिः - होराद्वयम् पूर्णाङ्काः -50

---

## A) यथेष्टं दशानां प्रश्नानाम् एकेन वाक्येन उत्तरं लिखत। 1x10=10

1. कृत्-प्रत्ययाः कर्त्रर्थे भवन्तीत्यत्र प्रमाणं किम्।
2. केलिमर-प्रत्ययः कस्मिन्नर्थे भवति।
3. षाकन्-प्रत्ययस्य षकारस्य इत्संज्ञा केन भवति।
4. नेत्रम् इत्यत्र केन सूत्रेण ष्ट्रन्-प्रत्ययः।
5. यशस्करी इत्यत्र विसर्गस्य षत्वं कथम्।
6. अरुर्द्विषदजन्तस्य मुम् इति सूत्रार्थः कः।
7. सुशर्मा इत्यत्र इडागमस्य निषेधः केन।
8. सरसिजम् इत्यत्र ङेरलुक् केन।
9. प्रथमासमानाधिकरणेऽपि कथं सत्प्रत्ययौ भवतः।
10. रागः इत्यस्य लौकिकविग्रहः कः।
11. उपसमाधानं नाम किम्।
12. वेपथुः इत्यत्र कः प्रत्ययः विद्यते।

## B) यथेष्टं पञ्चानां प्रश्नानां व्याख्यानं कुरुत। 3x5=15

1. कार्यम् इति रूपं साधयत।
2. ज्ञः इति रूपं साधयत।
3. उष्णभोजी इति रूपं साधयत।
4. छिन्नः इति रूपं साधयत।
5. विद्वान् इति रूपं साधयत।
6. रागः इति रूपं साधयत।
7. दन्तच्छदः इति रूपं साधयत।

**C) यथेष्टं त्रयाणां प्रश्नानाम् उत्तरं लिखत।** **5x3=15**

1. कृत्यलुटो बहुलम् इति सूत्रं व्याख्यात।
2. नन्दिग्रहि..... सूत्रं पूरयित्वा व्याख्यात।
3. तुमुन्ण्वुलौ.....इति सूत्रं पूरयित्वा व्याख्यात।
4. च्छ्वोः शूड....इति सूत्रं पूरयित्वा व्याख्यात।
5. रलो व्युपधा...इति सूत्रं व्याख्यात।

**D) यथेष्टम् प्रश्नमेकम् उत्तरत।** **10x1=10**

1. शतृशानच्-प्रत्ययविधायकानि सूत्राणि वर्णयत।
2. निष्ठासंज्ञकस्य तकारस्य नकारविधायकानि सूत्राणि वर्णयत।

***

RKMVERI/DSS/MAIS/17-21/D2019/SK – 239

## SK-239 लघुसिद्धान्तकौमुद्यां कृत्ततद्धितौ

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

**A) नीचैः दत्तेषु यथेच्छं दश प्रश्नान् उत्तरत। 1x10=10**

1. जनम् अर्दयति इत्यस्मिन् विग्रहे किं रूपं कश्च प्रत्ययः?
2. कुम्भाकारः इत्यस्य कः विग्रहः, कश्च प्रययः?
3. जमेजयः शब्दस्य विग्रहं लिखत।
4. पण्डितम् आत्मानं मन्यते इत्यस्मिन् विग्रहे रूपद्वयं लिखत।
5. सोमयाजी इत्यस्य विग्रहवाक्यं किम्, कश्च प्रत्ययः?
6. पारदृश्वा शब्दस्य कः अर्थः?
7. हलः इति सूत्रस्य विग्रहं लिखत।
8. च्छ्वोः शूडनुनासिके च इति सूत्रस्य विग्रहं लिखत।
9. राल्लोपः इत्यस्य विग्रहं लिखत।
10. भिन्न इत्यत्र नत्वं केन?
11. ग्लानः इत्यत्र नत्वं केन?
12. पञ्चाालानां राजा इत्यस्मिन् विग्रहे किं रूपम् तद्धितप्रत्ययश्च कः?

**B) अधो लिखितेषु यथारुचि पञ्च समाधत्त। 3x5=15**

1. कुम्भकारः इति रूपं साधयत।
2. यशस्करी इति रूपं साधयत।
3. जनमेजयः इति रूपं साधयत।
4. पण्डितम्मन्यः इति रूपं साधयत।
5. जीनः इति रूपं साधयत।
6. षाण्मातुरः इति रूपं साधयत।
7. श्वशुर्यः इति रूपं साधयत।

**C) अत्र यथाच्छन्दं त्रयः समाधेयाः।** **5x3=15**

1. अतः कृकमिकंस... इत्यादिसूत्रं प्रपूर्य व्याख्यात।
2. लटः शतृशानच... इत्यादिसूत्रं प्रपूर्य व्याख्यात।
3. बहुलशब्दार्थं वर्णयत।
4. गोत्रसंज्ञायाः व्याख्यानं कुरुत।
5. समर्थानां प्रथमाद्वा इति सूत्रं व्याख्यात।

**D) निम्नलिखितेषु अनुप्रियमेकम् अनुबध्नीत।** **10x1=10**

1. कृत्यप्रत्ययान् वर्णयत।
2. वासरूपोऽस्त्रियाम् इति सूत्रं व्याख्यात।

***

RKMVERI/DSP/MAIS/16-21/D2019/MT/SK-241

## SK-241 महाभाष्ये 2-4 आह्निकानि

समयावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

**A) केषाञ्चिद् दशानां प्रश्नानाम् उत्तरं देयम्।** **1*10=10**

1. विवृतस्योपदिश्यमानस्य प्रयोजनमन्वाख्यायत इत्यस्य ज्ञापकं किम् ?
2. वर्णैकत्वपक्षे एकाज्ग्रहणेषु कथं निर्वाहः ?
3. आन्यभाव्यमकारस्य। कैः कारणैः ?
4. यदृच्छाशब्दाः के ?
5. संज्ञादिषु कथं लृकारोपदेशं विना दोषनिवृत्तिः ?
6. कीदृशमनुकरणं साधु भवति ?
7. कुतः अपशब्दः प्रकृतिः न भवति ?
8. सन्ध्यक्षरेषु तपरोपदेशे के दोषाः ?
9. सन्ध्यक्षरेषु कुत्र तपरग्रहणे क्रियमाणे दोषः न भवति ?
10. वर्णैकदेशाः वर्णग्रहणेन न गृह्यन्ते चेत् के दोषाः?
11. वर्णैकदेशाः के वर्णग्रहणेन गृह्यन्ते ?
12. तुल्यरूपे संयोगे द्विव्यञ्जनविधिः कुतः न भवति ?

**B) पञ्चानां प्रश्नानां समाधानं कुरुत।** **3*5=15**

1. विवृतस्योपदिश्यमानस्य प्रयोजनमन्वाख्यायते। कथमिति विशदयत।
2. आन्यभाव्यं तु कालशब्दव्यवायात्। प्रतिपादयत।
3. शकुनिवत्स्युः। वर्णयत।
4. रूपसामान्याद्वा। विवृणुत।
5. रवत्प्रतिषेधाच्च। विशदयत।
6. एकवर्णवच्च। वर्णयत।
7. तुल्यरूपे संयोगे द्विव्यञ्जनविधिः। विवेचयत।

**C) त्रीन् प्रश्नान् समाधत्त।** **5*3=15**

1. अकारस्यैकत्वे दोषानुद्भाव्य निवारयत।
2. ऌकारोपदेशः ल्पुताद्यर्थः इति भाष्यदिशा दर्शयत।
3. अतपर एच इग्घ्रस्वादेशे। विवृणुत।
4. दीर्घे ह्रस्वप्रतिषेधः। विशदयत।
5. अग्रहणे चेन्नुड्विधिलादेशविनामेषु ऋकारग्रहणम्। वर्णयत।

**D) द्वयोरेकं समाधत्त।** **10*1=10**

1. ऌकारोपदेशप्रयोजनं भाष्यदिशा विवेचयत।
2. वर्णैकदेशाः वर्णग्रहणेन गृह्यन्ते इति पक्षं भाष्यदिशा प्रतिपादयत।

***

RKMVERI/DSP/MAIS/15-20/D2019/MT/SK-242

**SK-242 महाभाष्ये पञ्चमषष्ठसप्तमाह्निकानि**

समयावधिः-होराद्वयम् | सत्रम् ९ | पूर्णाङ्काः-५०

## A) दश समाधेयाः १ x १० = १०

1. उपस्थिते हि दोषः स्यात्– उपस्थिते इत्युक्ते किम्?
2. तत्र सकि दोष इत्यस्य कोऽर्थः?
3. हरिशे इत्यत्र शे इति सार्थक उतानर्थकः?
4. अज्ग्रहणे क्रियमाणे एकग्रहणेन किं ज्ञाप्यते?
5. ओदन्तो निपात इत्यत्र च्व्यन्तस्य प्रतिषेधो वक्तव्य उत न?
6. सिद्धे प्रगृह्यसंज्ञार्थम् एव अदसो मात् इति प्रवर्तते चेत् कीदृशं सूत्रं कुर्यात्?
7. प्रगृह्यसंज्ञा-अयाद्यादेशयोर्मध्ये प्रगृह्यसंज्ञा कथं परा भविष्यति?
8. आश्रयात्सिद्धत्वं यथा रोरुत्वे इत्यस्य कोऽर्थः?
9. तत्र सकि दोषः इत्यत्र सकि इत्युक्ते किम्?
10. एकाच् इत्यत्र कः समासः?
11. अन्यत्र वर्णग्रहणे जातिग्रहणं भविष्यति– अन्यत्र नाम कुत्र?

## B) यथाभीष्टं पञ्च समाधत्त ३ x ५ = १५

1. ईदाद्यन्तम् इति चेदेकस्य विधिः इति व्याख्यात।
2. सप्तम्यामर्थग्रहणं ज्ञापकं प्रत्ययलक्षणप्रतिषेधस्य इति व्याख्यात।
3. शुक्ल्यास्तां वस्त्रे इत्यत्र दोषम् उद्भाव्य समाधत्त।
4. मात्प्रगृह्यसंज्ञायां तस्यासिद्धत्वात् अयावेकादेशप्रतिषेधः इति व्याख्यात।
5. ईषदर्थे इति कारिकां व्याख्यात।
6. ओतश्च्विप्रतिषेधः इति व्याख्यात।
7. ऊञ ऊँ इति व्याख्यात।

## C) यथाभीष्टम् त्रीणि समाधत्त ५ x ३ = १५

1. ईदादयो द्विवचनं प्रगृह्या इति चेदन्त्यस्य विधिः इति व्याख्यात।

2. ईदाद्यन्तं द्विवचनान्तम् इति चेल्लुकि प्रतिषेधः इति व्याख्यात।

3. शे इति सूत्रं भाष्यदिशा व्याख्यात।

4. निपात एकाजनाङ् इति सूत्रं भाष्यदिशा व्याख्यात।

5. ओत् इति सूत्रं भाष्यदिशा व्याख्यात।

**D) एकम् उत्तरयत** **१० x १ = १०**

1. अदसो मात् इति सूत्रं भाष्यदिशा व्याख्यात।

2. ईदूतौ च सप्तम्यर्थे इति भाष्यदिशा व्याख्यात।

***

RKMVERI/DSP/MAIS/16-21/D2019/MT/SK-255

## SK-255 परिभाषेन्दुशेखरे 1 तः 50 परिभाषां यावद्भागः

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

**A) यथेष्टं दश प्रश्नान् उत्तरत। 1*10=10**

1. अस्मिन् ग्रन्थे कानि परिभाषारूपाणि व्याखायन्ते?
2. तत्रोपलम्भादन्यत्रानुपलम्भाच्च इत्यनेन का परिभाषा साध्यते?
3. अयादिभ्यः परैव प्रगृह्यसञ्ज्ञा इति कस्मिन् सूत्रे उक्तम्?
4. अभिव्यक्तपदार्थाः ये, इति श्लोकः किं मूलकः?
5. स्थानिवदादेशोऽनल्विधौ इत्यत्र आदेशग्रहणेन किं ज्ञाप्यते ?
6. चेता इत्यादौ प्रमाणत आन्तर्यादकरोऽपि गुणः किमर्थं न भवति?
7. इको गुणवृद्धी इति कैयटस्तु चिन्त्य एव कुतः अस्य चिन्त्यत्वम्?
8. भाव्यमानोऽप्युकारः सवर्णान् गृह्णातीति परिभाषा क्व स्पष्टा?
9. उभयगतिरिह भवति इत्यत्र इह पदेन किं गृह्यते ?
10. दिदीय इत्यत्र यणादेशः कुतो न ?
11. अर्थवद्ग्रहणपरिभाषा वर्णग्रहणेषु न प्रवर्तते इति क्व स्पष्टम्?
12. वर्णाश्रये नास्ति प्रत्ययलक्षम् इति परिभाषा क्व प्रवर्तते ?

**B) यथाकामं पञ्च प्रश्नान् उत्तरत। 3*5=15**

1. कार्यकालपक्षे अयादिभ्यः परैव प्रगृह्यसञ्ज्ञा इत्यस्य आशयं यथाग्रन्थं प्रतिपादयत।
2. क्वचिदोकदेशो अपि अनुवर्तत इति परिभाषायाः अवतरणं विलिख्य व्याख्यात।
3. नानुबन्धकृतमसारूप्यम् इति परिभाषां निरूपयत।
4. दीधीवेवीटाम् इति सूत्रस्थभाष्यस्य एकदेश्युक्तित्वं साधयत।
5. स्वं रूपमिति स्वशब्देन कथम् अर्थवद्ग्रहणपरिभाषा साधिता ?
6. अनिनस्मन्ग्रहणान्यर्थवता चानर्थकेन इति परिभाषां सोदाहरणं व्याख्यात ।
7. एकयोगनिर्दिष्टानां सह वा प्रवृत्तिः इति परिभाषां निरूपयत।

**C) यथाकामं त्रीन् प्रश्नान् उत्तरत। 5*3=15**

1. उभयगतिरिह भवति परिभाषां व्याख्यात।
2. कार्यमनुभवन् हि कार्यी निमित्ततया नाश्रीयते परिभाषां व्याख्यात।
3. यदागमपरिभाषा स्थानिवत् सूत्रेण गतार्था उत नेति यथाग्रन्थं निरूपयत ?।
4. कार्यकालं सञ्ज्ञापरिभाषमिति यथाग्रन्थं निरूपयत ।
5. वर्णाश्रये नास्ति प्रत्ययलक्षणमिति परिभाषां व्याख्यात।

**D) यथाकाममेकमुत्तरत। 10*1=10**

1. गौणमुख्यपरिभाषां यथाग्रन्थं विशदयत ।
2. निर्दिश्यमानपरिभाषां व्याख्यात।

***

RKMVERI/DSP/MAIS/16-21/D2019/MT/SK-265

**SK-265 लघुशब्देन्दुशेखरे न पदान्तयावद्भागः**

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

**A) यथेष्टं दश प्रश्नान् उत्तरत। 1x10=10**

1. स्वौजसमौड् इत्यादीनां षड्विधसूत्रेषु क्वान्तर्भावः?
2. सामर्थ्ययोगान्न हि किञ्चिदत्र पश्यामि शास्त्रे यदनर्थकमिति क्व सूत्रभाष्ये उक्तम्?
3. हलन्त्यम् इत्यत्र उपदेशपदानुवृत्तिःकिमर्थम् ?
4. प्रकल्प्य इत्यस्य कैयटेन को अर्थःउक्तः?
5. तपरसूत्रं विभक्तितकारे न प्रवर्तते इत्यत्र किं प्रमाणम्?
6. आकारहकारयोः सावर्ण्ये हो ढ इति कस्योपलक्षणम्?
7. नाज्झलौ इत्यत्र आकारप्रश्लेशे किं लिङ्गम्?
8. ऊकारस्य अल्पप्राणत्वमुत महाप्राणत्वम्? कथम्?
9. एक एव यत्नः सर्वकार्यजनक इति क्व सूत्रभाष्ये उक्तम्?
10. अचो अस्पृष्टा ..... निबोधानुप्रदानत इति कारिकां लिखत?
11. कण्ठादीनां स्थानत्वव्यवहारः कथम्?
12. शिक्षायां कवर्गस्य उच्चारणस्थानं किमुक्तम्?

**B) यथाकामं पञ्च प्रश्नान् उत्तरत। 3x5=15**

1. उपजीव्यविरोधात् सन्धिर्न इति मतं दूषयत।
2. पूर्वं ह्यपवादा अभिनिविशन्ते पश्चादुत्सर्गा इत्यस्याशयं लिखत।
3. यद्वा सम्प्रसारणाश्रयस्य प्रतिषेध इत्यमूमंशं सप्रसंङ्गं व्याख्यात।
4. यथार्थं वा षष्ठीनिर्देश इति एकदेश्युक्तिं निरूपयत।
5. मुखनासिकावचन इति सूत्रं व्याख्यात।
6. अ अ इति सूत्रं व्याख्यात।
7. ऐ औ च् सूत्रस्य वैयर्थ्यम् उपपादयत।

**C) यथाकामं त्रीन् प्रश्नान् उत्तरत।** **5x3=15**

1. ऊकाल इति सूत्रं व्याख्यात।
2. ऋलृवर्णयोर्मिथः सावर्ण्यमिति इति वार्तिकं व्याख्यात।।
3. तपरतत्कालस्य इति सूत्रं व्याख्यात।।
4. सवर्णसंज्ञायां यावदास्यभवतुल्यं ग्राह्यमिति यथाग्रन्थं निरूपयत।
5. नाज्झलौ इति सूत्रं व्याख्यात।

**D) यथाकाममेकमुत्तरत।** **10x1=10**

1. पूर्वत्रासिद्धमिति सूत्रं व्याख्यात।
2. अणुदित् सूत्रं यथाग्रन्थं निरूपयत।

***

RKMVERI/DSP/MAIS/15-20/D2019/MT/SK-267

**SK-267 लघुशब्देन्दुशेखरे कारकप्रकरणम्**

समयावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

**A) यथेष्टं दशानां प्रश्नानाम् उत्तरं लिखत। 1x10=10**

1. हेतुलक्षणं लिखत।
2. करणलक्षणं लिखत।
3. अलं श्रमेण इत्यत्र केन तृतीया।
4. अभिनिविशश्च इत्यत्र का विभाषा।
5. कर्तृतृतीयाविभक्तेरर्थः कः।
6. सम्प्रदानचतुर्थीविभक्तेरर्थः कः।
7. अधिशीङ्स्थासाम् इत्यस्य विग्रहं लिखत।
8. उपान्वध्याङ्वसः इत्यस्य विग्रहं लिखत।
9. प्रत्यवसानं नाम किम्।
10. पित्रा संजानीते इत्यत्र तृतीयाविभक्तेरर्थः कः।
11. ईप्सितत्वं नाम किम्।
12. अध्ययनेन वसति इत्यत्र केन तृतीया।

**B) यथारुचि पञ्च प्रश्नान् समाधत्त। 3x5=15**

1. कर्मणि द्वितीया इति सूत्रं व्याख्यात।
2. गां दोग्धि पयः इति वाक्यं ससूत्रं साधयत।
3. माणवकं धर्मं ब्रूते इति वाक्यं ससूत्रं साधयत।
4. हृक्रोरन्यतरस्याम् इति सूत्रस्याशयं प्रकाशयत।
5. सहयुक्तेऽप्रधाने इति सूत्रं व्याख्यात।
6. येनाङ्गविकारः इति सूत्रं व्याकुरुत।
7. दिवः कर्म च इति सूत्रं परिष्कुरुत।

**C) यथेष्टं त्रयाणामुत्तरं लिखत** **5x3=15**

1. कर्मणा यमभिप्रैति स सम्प्रदानम् इति सूत्रार्थं विवेचयत।
2. तथायुक्तं चानीप्सितम् इति सूत्रार्थं परिष्कुरुत।
3. कारके इति सूत्रस्याशयं प्रकाशयत।
4. अनभिहिते इत्यस्य सार्थकता निरर्थकता वेति वर्णयत।
5. कर्तुरीप्सिततमं कर्मेति सूत्रे ईप्सिततमपदस्य प्रयोजनं लिखत।

**D) एकस्योत्तरं लिखत** **10x1=10**

1. साधकतमं करणम् इति सूत्रं वर्णयत।
2. स्वतन्त्रः कर्ता इति सूत्रं व्याख्यात।

***

RKMVERI/MAIS/DSP/15-20/MT/D2019/SK-273

**SK-273 वैय्याकरणभूषणसारः (समासशक्तितः आन्तं यावत्)**

समयावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

**A) यथेष्टं दशप्रश्नानाम् एकेन वाक्येन उत्तरं लिखत- 1x10=10**

1. प्राचीनमते बहुव्रीहेः किं लक्षणम् ?
2. पदोद्देश्यकविधित्वं केष्वस्ति ?
3. जहत्स्वार्था नाम का ?
4. प्राप्तोदकः इत्यस्य शाब्दबोधः कः ?
5. समासे संसर्गस्य वाच्यत्वे राजपुरुषपदेन कीदृशो बोधः ?
6. उपहृतपशुः इत्यस्य शाब्दबोधः कः ?
7. कस्य मते चकारादिप्रतिषेधो वक्तव्यः ?
8. चित्रगु इत्यत्र चरमपदे लक्षणायां कथं बहुव्रीह्यसम्भवः ?
9. नैयायिकाः समासे कीदृशं सामर्थ्यं स्वीकुर्वन्ति ?
10. प्रातिपदिकसंज्ञारूपं कार्यं किमनुमापयति ?
11. सन्निहितपदार्थगतस्वार्थबोधकत्वव्युत्पत्तौ कुत्र व्यभिचारः ?
12. राजपुरुषादौ अनन्वयप्रसङ्गः केन कारणेन ?

**B) यथेष्टं पञ्चानां प्रश्नानाम् उत्तरं लिखत- 3x5=15**

1. समासस्तु चतुर्थेति कुतः प्रायोवादः ?
2. अजहत्स्वार्थपक्षः कः ?
3. पङ्कजशब्दवदित्यस्य कोऽर्थः ?
4. उदकाभिन्नप्राप्तिरिति बोधोत्तरं ग्रामे लक्षणा कुतः न सम्भवति ?
5. व्यपेक्षावादिमते विभाषाधिकारं विनापि कथं विकल्पसिद्धिः?
6. प्रकृतित्वाश्रये विभक्त्यर्थान्वयः इति पक्षे कः दोषः ?
7. समासे पदाने परस्परमन्वयः कुतः न भवति?

**C) यथेष्टं त्रयाणां प्रश्नानाम् उत्तरं लिखत-** **5x3=15**

1. समासभेदान् सोदाहरणं वर्णयत।
2. बहूनां वृत्तिधर्माणामिति विशदयत।
3. प्राप्तोदकः इत्यत्र व्यपेक्षावादिमते दोषाः।
4. अषष्ठ्यर्थबहुव्रीहौ व्युत्पत्त्यन्तरकल्पना कथम् ?
5. प्रातिपदिककार्यमर्थवत्वमनुमापयति। विशदयत।

**D) उपन्यसत-** **10x1=10**

1. समासस्य भेदान् निरूप्य प्राचां मतं खण्डयत।
2. नैय्यायिकमीमांसकैः कृतं वैय्याकरममतनिरासं वर्णयत।

***

RKMVERI/DSP/MAIS/15-20/MT/D2019/SK-281

## SK-281 वाक्यपदीयम् (ब्रह्मकाण्डम्)

समयावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

**A) यथेष्टं दशानां प्रश्नानाम् एकेन वाक्येन उत्तरं लिखत- 1x10=10**

1. ब्रह्मणः अनुकारः कः ?
2. इयं सा मोक्षमाणानामजिह्मा राजपद्धतिः। किम् ?
3. तत्त्वावबोधः शब्दानां कस्मात् ?
4. शब्दार्थसम्बन्धः कीदृशः ?
5. प्रयोजनस्य भेदद्वयं किम् ?
6. के धर्मसाधनम् ?
7. ऋषीणां यज्ज्ञानं तत्कस्मान्न विशिष्यते ?
8. निर्ज्ञातशक्तेर्द्रव्यस्य शक्तिः कदा प्रतिबद्ध्यते ?
9. मणिरूप्यादिविज्ञानं तद्विदां केन प्रमाणेन ?
10. उपादानशब्दस्य कति भेदाः ?
11. कः प्रकाशान्तरकारणम् ?
12. शब्दे कौ प्रकाशते ?

**B) यथेष्टं पञ्चानां कारिकाणां व्याख्यां लिखत- 3x5=15**

1. अध्याहिकलां यस्य कालशक्तिमुपाश्रिताः।
   जन्मादयो विकाराः षड् भावभेदस्य योनयः॥
2. भेदानां बहुमार्गत्वं कर्मण्येकत्र चाङ्गता।
   शब्दानां यतशक्तित्वं तस्य शाखासु दृश्यते॥
3. आसन्नं ब्रह्मणः तस्य तपसामुत्तमं तपः।
   प्रथमं च्छन्दसामङ्गमाहुर्व्याकरणं बुधाः॥

4. नित्याः शब्दार्थसम्बन्धास्तत्राम्नाता महर्षिभिः।

सूत्राणामनुतन्त्राणां भाष्याणाञ्च प्रणेतृभिः॥

5. हस्तस्पर्शादिवान्धेन विषमे पथि धावता।

अनुमानप्रधानेन विनिपातो न दुर्लभः॥

6. यत्नेनानुमितोप्यर्थः कुशलैरनुमातृभिः।

अभियुक्ततरैरन्यैरन्यथैवोपपाद्यते॥

7. अरणिस्थं यथा ज्योतिः प्रकाशान्तरकारणम्।

तद्वच्छब्दोपि बुद्धिस्थः श्रुतीनां कारणं पृथक्॥

**C) त्रयाणाम् उत्तरं लिखत-** **5x3=15**

1. वेदस्य सर्वमूलत्वं प्रमाणयत।
2. अभ्यासादृष्टयोः प्रामाण्यं व्यवस्थापयत।
3. अनुमानप्रमाणस्य दौर्बल्यं विचारयत।
4. शब्दार्थयोः भेदद्वयं प्रतिपादयत।
5. आगमप्रमाणस्य वैशिष्ट्यं निरूपयत

**D) उपन्यसत-** **10x1=10**

1. शब्दब्रह्मणः स्वरूपं यथाग्रन्थं विवृणुत।
2. अष्टौ पदार्थान् वर्णयत।

***

RKMVERI/DSP/MAIS/16-21/D2019/MT/SK-311

**SK-311 अर्थसंग्रहः**

कालावधिः - होराद्वयम् पूर्णाङ्काः - 50

---

**A) नीचैः दत्तेषु यथाकामं दश प्रश्नान् उत्तरत। 1x10=10**

1. का नाम प्रकृतिः?
2. 'जिज्ञासा पदस्य विचारे लक्षणा' कुतः?
3. गुणविधौ धात्वर्थस्य कथमन्वयः?
4. अनारभ्यविधिः कः?
5. सदनकरणं नाम किम्?
6. मीमांसकमते आख्यातप्रत्ययवाच्यं किम्?
7. सप्तमीविभक्तिश्रुतेः उदाहरणं किम्?
8. आख्याताभिहितसंख्यायाः यागाङ्गत्वं कया श्रुत्या?
9. उत्पत्तिविधेः लक्षणं किम्?
10. "अर्थसंग्रहः" इत्यस्य कोऽर्थः?
11. को नाम धर्मः?
12. जिज्ञासासूत्रे अतःशब्दस्यार्थः कः?

**B) निम्नलिखितेषु यथारुचि पञ्च विव्रियन्ताम्। 3x5=15**

1. प्रकृतिविकृतिलक्षणम्।
2. आर्थीभावनाया अंशत्रयम्।
3. वाक्यप्रमाणम्।
4. विशिष्टविधौ वाक्यभेददोषपरिहारः।
5. विधिलक्षणम्।
6. विनियोगविधिः।
7. यागस्य रूपद्वयम्।

**C) अत्र यथाच्छन्दं त्रयः समाधेयाः। 5x3=15**

1. लिङ्गप्रमाणस्य स्वरूपं, वाक्यादिभ्यः प्राबल्यं च।
2. "सोमेन यजेत" इत्यत्र विशिष्टविधिविचारः।
3. त्रिविधा विनियोक्त्री श्रुतिः।
4. शाब्दीभावनायाः लक्षणं, तस्या अंशत्रयञ्च।
5. उत्पत्त्यादिविधित्रयस्य लक्षणविचारः।

**D) अधस्ताद् अनुप्रियमेकं अनुबध्नीत। 10x1=10**

1. भावनाविषयमधिकृत्य यथाग्रन्थं लघूपन्यासं कुरुत।
2. विनियोगविधिलक्षणं निरूप्य, तत्सहकारिप्रमाणं यथेच्छं द्वयं सोदाहरणं व्याख्यात।

***

RKMVERI/DSP-WW/MAIS/16-21/D2019/MT/SK-311

**SK-311 अर्थसंग्रहः**

कालावधिः होराद्वयम् पूर्णाङ्काः-50

---

**A) यथाकामं दशप्रश्नाः समाधेयाः 1x10=10**

1. अर्थसंग्रहग्रन्थस्य रचयिता कः?
2. मीमांसाशास्त्रे कति अध्यायाः सन्ति?
3. 'यजेत' इत्यत्र किमस्ति अंशद्वयम्?
4. अध्ययनविधिः कः?
5. वेदः कः?
6. 'जैमिनिनये' इत्यत्र नयशब्देन किं बुध्यते?
7. वेदवाक्यं कतिधा विभज्यते?
8. परिसंख्याविधेः उदाहरणं प्रदेयम्।
9. मीमांसाशब्दस्य कोऽर्थः?
10. किं खलु धर्मजिज्ञासासूत्रम्?
11. उत्पत्तिविधौ करणं किम्?
12. भास्करेण कमुद्दिश्य नमस्कारः विहितः?

**B) यथारुचि अधोलिखितेषु पञ्चानामुत्तरं लिखत। 3x5=15**

1. शाब्दीभावनायाः अंशत्रयं प्रतिपाद्यताम्।
2. "स्वाध्यायोऽध्येतव्यः" इति विधिवाक्यं वेदे कुत्र अस्ति?
3. अर्थसंग्रहग्रन्थस्य नामकरणे किं तात्पर्यम्?
4. भूतार्थवादः कः?
5. गुणविधौ धात्वर्थस्य कथमन्वयः?
6. दध्ना जुहोतीत्यत्र विधित्वं कथं ज्ञातम्?
7. 'अथातो धर्मजिज्ञासा' इति सूत्रे जिज्ञासापदस्य कोऽर्थः?

**C) अधोलिखितेषु त्रयः समाधेयः।** **5x3=15**

1. विशिष्टविधिः
2. निषेधः
3. आर्थीभावना
4. धर्मः
5. मत्वर्थलक्षणा

**D) अत्र अनुप्रियमेकमनुबध्नीत।** **10x1=10**

1. विधेर्लक्षणं व्याख्यायताम्? उदाहरणमुखेन विधेर्भेदान् आलोच्यताम्।
2. अर्थवादः कः? सप्रभेदं वर्ण्यताम्।

***

RKMVERI/DSP/MAIS/18-23/D2019/MT/SK-341

## SK-341 तर्कसङ्ग्रहो न्यायबोधिनीसहितः

समयावधिः-होराद्वयम् | सत्रम् ७ | पूर्णाङ्काः-५०

---

**A) दश समाधेयाः** **१ x १० = १०**

1. अपां लक्षणं किम्?
2. तैजसम् इन्द्रियं किम्?
3. जलीयं शरीरं कुत्र प्रसिध्यति?
4. आकाशस्य लक्षणं किम्?
5. कालस्य लक्षणं किम्?
6. रूपं कतिविधम्? कानि च तानि?
7. गुरुत्वस्य लक्षणं किम्?
8. पञ्चावयवाः के?
9. स्मृतिः कतिविधा?
10. उपमितेः करणं किम्?
11. आकाङ्क्षा का?
12. सामान्यस्य लक्षणं किम्?

**B) यथाभीष्टं पञ्चानां विषये टिप्पणी लेख्या** **३ x ५ = १५**

1. साधारणसव्यभिचारः
2. विरुद्धः
3. आश्रयासिद्धः
4. व्याप्यत्वासिद्धः
5. स्वरूपासिद्धः
6. बाधितः
7. स्वार्थानुमानम्

**C) यथाभीष्टं तिसृः परिभाषाः व्याख्यात** **५ x ३ = १५**

1. समवायिकारणम्
2. व्यापारः
3. परामर्शः
4. उपाधिः
5. परार्थानुमानम्

**D) यथाभीष्टम् एकां परिभाषां व्याख्यात** **१० x १ = १०**

1. तमसः दशमद्रव्यत्वं निरासयत।
2. षड्विधसन्निकर्षान् विवेचयत।

***

RKMVERI/DSP/MAIS/17-22/D2019/MT/SK-344

**SK-344 न्यायसिद्धान्तमुक्तावल्यां प्रत्यक्षखण्डः**

